# Abhayasam Stava

# અભયસંસ્તવઃ

## Document Information

Text title : Abhayasam Stava

File name : abhayasaMstavaH.itx

Category : vishhnu, vAdirAja, vishnu, stava, dashaka

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Uma Mahesh, Revathy R.

Latest update : May 7, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 7, 2024

*sanskritdocuments.org*

# અભયસંસ્તવઃ

યસ્માન્મયિ દયાળુસ્ત્વમાભિમુખ્યં પુરાઽકરોઃ ।
તસ્માત્કદાઽપિ કુત્રાપિ કુતોઽપિ ન ભયં મમ ॥ ૧॥

ત્વદ્દયાર્દ્રદૃશા દૃષ્ટા બ્રહ્માદ્યા લોકપાલતામ્ ।
અગમન્નિગમોદ્ધર્તઃ ક્વ દૈન્યં ક્વ ચ તે દયા ॥ ૨॥

યં પાસિ ત્વં કિમ્પુરુષે સોઽત્ર સાક્ષી કપીશ્વરઃ ।
તથા વિભીષણઃ સાક્ષી દિવિ સાક્ષી ધ્રુવો ધ્રુવઃ ॥ ૩॥

ભુવોઽધસ્તાદ્બલિઃ સાક્ષી યદ્દ્વાર્યદ્યાપિ વર્તસે ।
ધરા ચ સાક્ષિણી યા પ્રાગ્વરાહવપુષોદ્ધૃતા ॥ ૪॥

વેદશ્ચ સાક્ષી યદ્ગ્રન્થં બિભર્ષિ કરપઙ્કજે ।
ગિરિશ્ચ મન્દરઃ સાક્ષી દેવાશ્ચાધ્વનિ ચૂર્ણિતાઃ ॥ ૫॥

ભવઃ સાક્ષી ભસ્મદૈત્યભસ્મીકરણવિક્રમ ।
દક્ષસ્સાક્ષી રક્ષિતો યસ્ત્વયા દેવર્ષિસંસદિ ॥ ૬॥

દ્રૌપદી ચ તથા સાક્ષિણ્યક્ષયામ્બરદાયક ।
સૌભદ્રસ્ય સુતઃ સાક્ષી યં દ્રૌણ્યસ્ત્રાદજીવયઃ ॥ ૭॥

સુધાદૃષ્ટિમૃતાશેષસ્વસૈન્યોજ્જીવનૈકદ ।
કપિસેના સાક્ષિણી સા પ્રહ્લાદાજામિળાવપિ ॥ ૮॥

ભૂયો ભૂયઃ સાહચર્યાદ્ભયાભિર્નિર્ણીયતે કિલ ।
અતસ્ત્વં નિયમેનાસિ ભક્તાનાં ભયભઞ્જનઃ ॥ ૯॥

અકુતશ્ચિદ્ભયં પ્રાહ યતસ્તે પાદસેવનમ્ ।
સ્મૃતિર્ભાગવતાખ્યા તદ્વ્યાભિરાપ્તોક્તિતોઽપ્યભૂત્ ॥ ૧૦॥

દશદિક્ષુ ગતાઽસદ્ભ્યઃ સતાં ભયજિહીર્ષયા ।
દશશ્લોક્યા વાદિરાજશ્ચકારાભયસંસ્તવમ્ ॥ ૧૧॥

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતઃ અભયસંસ્તવઃ સમ્પૂર્ણઃ ।

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Proofread by Uma Mahesh, Revathy R.

*Abhayasam Stava*

pdf was typeset on May 7, 2024

Please send corrections to *sanskrit@cheerful.com*